योगवासिष्ठः/प्रकरणम् ६ (निर्वाणप्रकरणस्य पूर्वार्धम्)/सर्गः ००५

पञ्चमः सर्गः ५

श्रीराम उवाच ।

अहो अहं गतश्चित्त्वं भवद्वाक्यार्थभावनात् ।

शान्तं जगज्जालमिदमग्रस्थमपि नाथ मे ।। १

परामन्तः प्रयातोऽस्मि परमात्मनि निर्वृतिम् ।

दीर्घावग्रहसंतप्तं वृष्ट्येव वसुधातलम् ।। २

शाम्यामि शीतलाकारः सुखं तिष्ठामि केवलम् ।

प्रसादमनुयातोऽहं सरो निर्वारणं यथा ।। ३

सम्यक्प्रसन्नमखिलं दिङ्मण्डलमिदं मुने ।

यथाभूतं प्रपश्यामि निर्नीहारमिवाधुना ।। ४

जातोऽस्मि गतसंदेहः शान्ताशामृगतृष्णिकः ।

रागनीरागनिर्मुक्तो मृष्टजङ्गलशीतलः ।। ५

आत्मनैवान्तरानन्दं तत्प्राप्तोऽस्म्यन्तवर्जितम् ।

रसायनरसास्वादो यत्र नाथ तृणायते ।। ६

अद्याहं प्रकृतिस्थोऽस्मि स्वस्थोऽस्मि मुदितोऽस्मि च ।

लोकारामोऽस्मि रामोऽस्मि नमो मह्यं नमोस्तु ते ।। ७

ते संशयास्ताः कलनाः सर्वमस्तं गतं मम ।

रात्रिवेतालसंसारः प्रभात इव भास्करे ।। ८

निर्मले हृदि विस्तीर्णे संपन्ने हिमशीतले ।

मनो निर्वृतिमायातं सरसी शरदीव मे ।। ९

कलङ्क आत्मनः कस्मात्कथं चेत्यादिसंशयः ।

नूनं निर्मूलतां यातो मृगाङ्काग्रे यथा तमः ।। १०

सर्वमात्मैव सर्वत्र सर्वदा भाविताकृतिः ।

इदमन्यदिदं चान्यदित्यसत्कलना कुतः ।। ११

कोऽभवं प्रागहं तादृक्तृष्णानिगडयन्त्रितः ।

अन्तरात्मानमेवेति विहसामि विकासवान् ।। १२

आ इदानीं स्मृतं सम्यग्यथैष सकलोऽस्म्यसौ ।

यस्त्वद्वागमृतापूरस्नातेनायमहं स्थितः ।। १३

अहो नु विततां भूमिमधिरूढोऽस्मि पावनीम् ।

इहस्थ एव यत्रार्को न पातालमिव स्थितः ।। १४

मह्यं सत्तामुपेताय भावाभावभवार्णवात् ।

नमो नित्यं नमस्याय जयाम्यात्मात्मनात्मनि ।। १५

अनुभववशतो हृदब्जकोशे

स्फुटमलितां समुपागतेन नाथ ।

तव वरवचसेह वीतशोकां

चिरमुदितां च दशामुपागतोऽस्मि ।। १६

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये दे० मोक्षोपायेषु निर्वाणप्रकरणे पू० राघवविश्रान्तिवर्णनं नाम पञ्चमः सर्गः ।। ५ ।।